भूतविकारत्वावगमात्। अतः पुराणवचनानीन्द्रियाणामहङ्काराधीनतामात्रं प्रतिपादयन्ति। यच्च शुष्कतार्किकैः भौतिकत्वमिन्द्रियाणामुक्तम्। तदप्ययुक्तम्। तन्मानस्य वक्तुमशक्यत्वात्। इन्द्रियाणि भौतिकानि सावयवत्वात् घटादिवत् सावयवत्वं च मध्यमपरिमाणत्वादिति चेत् न, इन्द्रियाणामणुपरिमाणत्वेऽपि बाधाभावात् हेत्वसिद्धेः विषयावभासस्याप्यणुत्वप्रसङ्गो बाध इति चेत् न त्वन्मतेऽणुपरिमाणेनापि मनसा विस्तृतात्मादिवस्तुदर्शनसद्भावात्। चक्षुः रूपगुणवत्प्रकृतिकं रूपादिषु पञ्चसु मध्ये रूपस्यैवाभिव्यञ्जकत्वात् यस्य यन्नियमेनावभासकं तत्तद्गुणवत्प्रकृतिकं यथा रूपाभिव्यञ्जकरूपवत्प्रकृतिको दीपः एवमन्यत्राप्यूहनीयमिति चेत् न शब्दस्यैवाभिव्यञ्जके श्रोत्रे शब्दगुणवदाकाशानारब्धेऽनैकान्तिकत्वात् कर्णशष्कुल्यवच्छिन्नाकाशमात्रस्य त्वया श्रोत्रत्वाभ्युपगमात् विशेषव्याप्तौ नानैकान्तिकत्वमिति चेत्। एवमप्यतिप्रसङ्गो दुर्वारः। रूपादिचतुष्टयाभिव्यञ्जकस्य मनसो भूतचतुष्टयारभ्यत्वस्य सुसाध्यत्वात्। अभूतस्याप्यात्मादेर्ग्राहकतया मनो न भूतारभ्यमिति चेत् तर्हि संख्यापरिमाणादेरपि ग्राहकतया चक्षुरादीनां भूतारभ्यत्वं न स्यात् असाधारणविषयारभ्यत्वाङ्गीकारे सति भौतिकत्वसिद्धिरिति चेत् तर्हि मनोऽप्यसाधारणविषयेणारभ्येत एकद्रव्यस्यात्मनः सावयवद्रव्यानारम्भकत्वे निरवयवं मनोद्रव्यं प्रत्यारम्भकत्वं किन्न स्यात्। तस्मान्न शुष्कतर्कादिन्द्रियाणां भौतिकत्वसिद्धिः किन्तु आगमादेव। तानि पुनरिन्द्रियाणि सर्वगतानीति योगाः प्रतिपेदिरे तदपि मानहीनम्। आत्मेन्द्रियमनांसि सर्वगतानि सर्वत्रदृष्टकार्य्यत्वात् आकाशतत्त्ववत् दृश्यते हि ज्ञानं तत्कार्य्यं च सर्वत्रेति चेत् न सर्वत्रेत्यनेन कृत्स्नजगद्विवक्षायामसिद्धिप्रसङ्गात्। यत्र शरीरं तत्र सर्वत्रेति विवक्षायां शरीर एवानैकान्तिकत्वात्। दृश्यते हि यत्र सर्वत्र शरीरं तत्र शरीरकार्य्यं न च शरीरस्य सर्वगतत्वमस्ति। अथेन्द्रियाणि सर्वगतानि परोपाधिकगमनत्वात् आकाशवत्। यथाऽऽकाशस्य गमनं घटाद्युपाधिकं तथेन्द्रियाणां गमनं शरीरोपाधिकमिति चेत् न शरीरावयवेष्वनैकान्तिकत्वात्। प्राणोपाधिकं हि तेषां गमनम्। किं च इन्द्रियाणां सर्वगतत्वे युगपत्सर्वविषयोपलब्धिः स्यात्। शरीर एव वृत्तिलाभान्न दोष इति चेत् तर्हि बहिरिन्द्रियसद्भावकल्पना न प्रमाणं प्रयोजनवती च। तस्मादसर्वगतानीन्द्रियाणि। यत्तु तान्यप्राप्यकारीणीति सुगताः कल्पयन्ति तदप्ययुक्तम्। तत्र किं चक्षुःश्रोत्रयोरप्राप्यकारित्वम् उत तदितरेषामपि न तावदितरेषां दूरत एव स्पर्शरसगन्धोपलब्धिप्रसङ्गात् नापि प्रथमः विमते चक्षुःश्रोत्रे प्राप्यकारिणी बाह्येन्द्रियत्वात् घ्राणादिवत्। तेजसश्चातिदूरशीघ्रगमनदर्शनात् उन्मीलनमात्रेण चक्षुषो ध्रुवादिप्राप्तिरविरुद्धा शब्दस्य च वीचिसन्तानवत् परम्परया श्रोत्रसमवायप्राप्तिरिति” यत्तार्किकैरुच्यते। तदसत् तथा सति इह श्रोत्रे शब्द इति प्रतीयेत प्रतीयते तु तत्र शब्द इति। तस्माद्यथानुभवं श्रोत्रस्यैव तत्र गमनं कल्पनीयम्। तदेवं भौतिकानि परिच्छिन्नानि प्राप्यकारीणीन्द्रियाणि सन्तीति सिद्धम्। किं तर्हि मनो नाम यस्मिन्नात्मत्वमपरे लौकायतिकैकदेशिनो मन्यन्ते। नित्यं निरवयवमणुपरिमाणं मन इति तार्किकाः। तत्र न तावन्नित्यं परिच्छिन्नत्वात् घटवत्। विमतं नित्यं निरवयवद्रव्यत्वात् आत्मवदिति चेत् न हेत्वसिद्धेः। विमतं सावयवङ्करणत्वाच्चक्षुरादिवत्। अन्यथा मनसोऽन्नमयत्वं श्रुत्युक्तं बाध्येत। कथं तर्हि मूर्त्तद्रव्यानभिघात इति चेत् जीवनदशायां देहाद्बहिर्निर्गमनाभावादिति ब्रूमः। मरणदशायां तु सावयवत्वेनाभिमतानां चक्षुरादीनामप्यप्रतिघातो विद्यत एव। अतएव सावयवत्वात् संयोगवत्त्वाच्च घटादिवन्नाणुपरिमाणत्वम् सर्वगतत्वे च युगपत् सर्वेन्द्रियसंयोगात् सर्वज्ञानप्रसङ्गः। मध्यमपरिमाणत्वे तु न कोऽपि दोषः। स्थूलसूक्ष्मेषु हस्तिपुत्तिकादिदेहेषु क्रमेण प्राप्यमाणेषु कथं तद्देहसमानत्वेन वृत्तिरिति चेत् अवयवोपचयापचयाभ्यामिति ब्रूमः। शाक्यास्तु समनन्तरप्रत्यय एवोत्तरज्ञानकारणतया मन इति प्रतिपेदिरे तन्न सङ्गतं व्याप्तिमनपेक्ष्य केवलस्य पूर्वज्ञानस्योत्तरज्ञानजनकत्वायोगात् लिङ्गज्ञानस्य व्याप्तिसापेक्षस्यैव लिङ्गिज्ञानजनकत्वदर्शनात्। शब्दज्ञानं व्याप्तिज्ञानमनपेक्ष्यैवार्थज्ञानजनकमिति चेत् न त्वन्मते शब्दस्यानुमानान्तःपातितया तत्रापि व्याप्त्यपेक्षत्वात्। विशेषणज्ञानं व्याप्त्यनपेक्षमेव विशिष्टज्ञानजनकमिति चेत् न विशिष्टज्ञानस्य संप्रयोगजन्यत्वात्। अथ समनन्तरातीतप्रत्ययः उत्तरज्ञानं न जनयति किं तु तस्याकारमात्रं समर्पयतीति चेत् न आकाराकारिणोरभेदात्। आकारस्य स्वाभाविकतयाऽनन्यापेक्षितया ऽन्यापेक्षाभावात्। तस्मादन्यदेव सावयवं मन इति सिद्धम्। ननु कस्यायं वास्तव आत्मा यो देहादिषु विज्ञानान्तेषु भ्रान्तैर्वादिभिरारोप्यते। तत्र सर्वगतोऽयं जीव आत्मेति केचित् तदसत्। शुष्कतार्किकाणां साधकाभावात्। अथ मतं देहाद्बहि-